(696) "तड भाषार्थः" (X-चुरादिः-1802. सक. सेट्. उभ. आस्वदीयः।)

ताडकः-डिका, तिताडयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगालयतिवत् (388) ज्ञेयानि। अस्य धातोरास्वदीयत्वेन 'आस्वदः सकर्मकात्' (ग. सू. चुरादौ) इत्यनेन सकर्मकादेव णिज् भवति। अकर्मकत्वे तु भ्वादिपाठेन परस्मैपदमेवेति ज्ञेयम्।

(697) "तडि ताडने" (I-भ्वादिः-280. सक. सेट्. आत्म.)

ताडनम् = निरसनम्।

तण्डकः-ण्डिका, तण्डकः-ण्डिका, तितण्डिषकः-षिका, तातण्डकः-ण्डिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककण्ठतिवत् (149) ज्ञेयानि। [1]वतण्डः, [2]वितण्डा, वैतण्डिकः.[A]

(698) "तत्रि कुटुम्बधारणे" (X-चुरादिः-1679. अक. सेट्. आत्म.) आकुस्मीयः।

तन्त्रकः-न्त्रिका, तितन्त्रयिषकः-षिका ; तन्त्रयिता-त्री तितन्त्रयिषिता-त्री ;
[3]तन्त्रयमाणः, तितन्त्रयिषमाणः ; तन्त्रयिष्यमाणः, तितन्त्रयिषिष्यमाणः ;
[4]तन्-तन्त्रौ-तन्त्रः ; — — —
तन्त्रितः, तितन्त्रयिषितः-तवान् ; तन्त्रः, स्वतन्त्रः, तितन्त्रयिषुः ;
तन्त्रयितव्यम्, तितन्त्रयिषितव्यम् ; तन्त्रणीयम्, तितन्त्रयिषणीयम् ;
तन्त्र्यम्, तितन्त्रयिष्यम् ; ईषत्तन्त्रः-दुस्तन्त्रः-सुतन्त्रः ; —
तन्त्र्यमाणः, तितन्त्रयिष्यमाणः ; तन्त्रः, तन्त्रम्, तितन्त्रयिषः ;
तन्त्रयितुम्, तितन्त्रयिषितुम् ; तन्त्रणा, तितन्त्रयिषा ;

---

1. अवपूर्वकादस्मात् पचाद्यचि (3-1-134) 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।' इति वचनेन 'अव' इत्यत्रोपसर्गस्थाकारस्य लोपे **वतण्डः** इति भवति।
2. विपूर्वकादस्मात् 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः। **वितण्डया** = दीव्यति = व्यवहरतीत्यर्थे, 'तेन दीव्यति खनति जयति जितम्' (4-4-2) इति ठक्प्रत्यये **वैतण्डिकः**। 'स्वपक्षस्थापनाहीनः परपक्षप्रतिक्षेपो **वितण्डा**' इति **न्यायसूत्रम्**।
3. 'आकुस्मादात्मनेपदिनः' (ग. सू. चुरादौ) इति वचनात् आत्मनेपदं शानच्।
4. क्विपि, णिलोपे, पूर्वं रेफस्य संयोगान्तलोपे, पश्चात् तकारस्यापि संयोगान्तलोपः।

A. 'अभुण्डितोच्चण्डगतीनशण्डनान् कुमार्गवैतण्डिकपण्डितावृतान्।' धा. का. 1.37.